१जलभवे २अश्वे पु० "अप्सुयोनिर्वाऽश्वः" इति शत० ब्रा० । जलजत्वमश्वस्य अप्सुजाशब्दे उक्तम् ।

**अप्सुषद्** त्रि० अप्सु जले कारणत्वेन सीदति सद–क्विप् वेदे षत्वम् । जलस्थे अग्नौ "चन्द्रमग्निं चन्द्ररथं हरिव्रतं वैश्वानरमप्सुषदम्" ऋ० ६,२,५ ।

**अप्सुषोम** पु० अप्सु अद्भिः सोम इव पवित्रत्वात् "सुपां सु" पा० व्यत्ययेन सप्तमी अलुक्समा० वेदे षत्वम् । जलपूर्णे चमसभेदे "अप्सुषोमानाम चमसाश्चात्वालदेशे अद्भिः पूर्णा" इति ता०ब्रा० द्राह्यायणसूत्रम् । "पूर्णपात्रान् समवस्थयन्ति यानेकेऽप्सुषोमा इत्याचक्षते" शत० ब्रा० ।

**अप्सुसंशित** पु० अद्भिः संशितः वि०व्य० अलुक्समा० जलनिमित्तभूते विष्णुक्रमेऽन्तरीक्षे "विष्णोः क्रमोऽसि सपत्नमप्सुसंशितो वरुणतेजाः" अथ० १०,५,२२, ।

**अफल** त्रि० नास्ति फलं पुष्पप्रभवं धर्मप्रभवं सुखादिकं वा यस्य । १वन्ध्ये फलकाले फलशून्ये (राँड़ावृक्ष) २धर्मकार्यसुखादिशून्ये ३निष्फले च । "यथा षौण्डोऽफलः स्त्रीषु यथा गौर्गवि चाफला । यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफल इति" मनुः । अफलं दानमाह मनुः "धूर्त्ते वन्दिनि मल्ले च कुवैद्ये कितवे शठे चाटचारणदासेषु दत्तं भवति निष्फलमिति" हारीतः । "अथासद्द्रव्यदानमस्वर्ग्यं दत्त्वा परितप्यते तद्धि दानमफलं यच्चोपकारिणे ददाति यच्च तन्मात्रं परिक्लिष्टं यच्च सोपधं ददाति अन्यश्राविततमल्पं यच्चापात्राय ददाति अनिष्टदानं स्रवति यच्च दत्त्वा प्रकीर्त्त्यते क्षयदानं यच्चाश्रद्धया ददाति क्रोधाद्राक्षसं यच्चाक्रुश्य ददाति दत्त्वा वा क्रोशति असत्कृतं पैशाचं यच्चावज्ञातं ददाति वावजानीते मुमूर्षोस्तामसं यच्चाप्रकृतौ ददाति" । "एतैर्दानोपसर्गैरुपसृष्टं दानमप्रशस्तमस्वर्ग्यमयशस्यमध्रुवफलं भवत्यल्पफलं वा रघु० (भाउ)। ४झावुकवृक्षे पु० तस्य फलशून्यत्वात्तथात्वम् । नास्ति फलमिव वृषणावस्य । ५इन्द्रे ! स हि गौतमशापात् वृषणशून्यो मेषवृषणश्चासीत् यथोक्तं रामायणे "नित्यं पुष्पफलोपेतैः पादपैरुपशोभिते ॥ स चेह तप आतिष्ठदहल्यासहितो मुनिः । संवत्सरसहस्राणि बहूनि रघुनन्दन ! ॥ तस्यान्तरं विदित्वाथ कामार्तस्त्रिदिवेश्वरः । मुनिवेशधरो भूत्वा सोऽहल्यामिदमब्रवीत् ॥ ऋतुकालः प्रतीच्योऽपि न प्रतीक्षे सुमध्यमे । संगमं शीघ्रमिच्छामि पृथुश्रोणि ! सह त्वया ॥ मुनिवेशधरं शक्रं सा ज्ञात्वापि परंतप ! । मतिं चकार दुर्मेधा देवराजकुतूहलात्" इत्युपक्रम्य ॥ "सोऽपि दृष्ट्वैव देवेन्द्रं मुनिवेशधरं मुनिः ॥ दुर्वृत्तं वृत्तसंपन्नो रोषाद्वचनमब्रवीत् । मम रूपं समास्थाय कृतवानसि दुर्मते ! ॥ अकर्तव्यमिदं यस्मात्तस्मात् त्वं विफलो भव । गौतमेनैवमुक्तस्य सरोषेण महात्मना ॥ पेततुर्वृषणौ भूमौ सहस्राक्षस्य राघव ! । व्यथितः स तदा चासीद्धतौजा विफलीकृतः ॥ धर्षितस्तपसोग्रेण कश्मलं चापि सोऽविशत्" इत्युक्त्वा । "गौतम क्रोधमुत्पाद्य सुरकार्यं चिकीर्षुणा ॥ अफलोऽहं कृतस्तेन क्रोधात् सा च निराकृता । शापदोषेण तेनास्य तपोविघ्नः कृतो मया ॥ तन्मां सुरगणाः! सर्वे! सर्षिसंघाः! सचारणाः । सुरकार्यार्थमफलं सफलं कर्तुमर्हथ ॥ शतक्रतोर्वचः श्रुत्वा देवा अग्निपुरोगमाः । ऊचुः पितृगणान् वाक्यमिदं तत्र समागतान् ॥ एष मेषः सवृषणः शक्रश्चावृषणीकृतः । अस्येमौ वृषणौ च्छित्त्वा महेन्द्राय प्रयच्छत ॥ अफलस्तु कृतो मेषः परां तुष्टिमुपैष्यति । भवतामुपयोगेन तच्चास्य सुमहत् फलम् ॥ तस्मान्मेषस्य वृषणौ च्छित्त्वेमौ दातुमर्हत । इन्द्राय सुरकार्यार्थं विफलाय पितामहाः ! ॥ श्रुत्वाथाग्निपुरोगाणां देवानां पितरो वचः । उत्कृत्य मेषवृषणाविन्द्रायोपददुस्तदा ॥ ततःप्रभृति काकुत्स्थ ! पितरः कव्यभोजिनः । अफलं भुञ्जते मेषं सफलं तु न भुञ्जते ॥ इन्द्रस्य मेषवृषणास्ततःप्रभृति राघव ! गौतमस्य प्रभावेन बभूवामिततेजसः" रामा० ॥ ६मेषे च तस्य वृषणेन शक्रवृषणकरणात्तस्य तथात्वम् नास्ति फलं यस्याः जातित्वेऽपि "फलाद्यन्त" इति पा० ग० अजादित्वात् टाप् । ७घृतकुमार्याम् ८भूम्यामलक्यां च स्त्री तयोः फलशून्यत्वात्तथात्वम् । फलं प्रयोजनम् ९तच्छून्ये त्रि० । "अन्यथा ते वर्त्तमानस्याधर्म्मो भवत्यफला च विद्या" सुश्रु० । "यथा षण्ड इत्यादि" मनुः ।

**अफलाकाङ्क्षिन्** त्रि० न फलं कर्मफलमाकाङ्क्षते आ+काङ्क्ष–णिनि ६त० न०त० स्त्रियां ङीप् । कर्मफलाकाङ्क्षाशून्ये । "अफलाकाङ्क्षिभिर्यज्ञः क्रियते ब्रह्मवादिभिः" गीता ।

**अफलित** त्रि० फलं जातमस्य तारका० इतच् न०त० । फलितभिन्ने वन्ध्ये अफले वृक्षे ।

**अफल्गु** त्रि० विरोधे न०त० । फल्गुभिन्ने सारे ।

**अफुल्ल** त्रि० न०त० । फुल्लभिन्ने मुकुलिते ।

**अफेन** त्रि० नास्ति फेनं यस्य । १फेनशून्ये दुग्धादौ । निन्दितं फेनं निर्यासोऽस्य ( आफिङ् ) ख्याते अहिफेने तस्य निर्यासस्य बहुसेवने प्राणनाशनात् निन्दितफेनत्वम् ।

**अब** शब्दे इदित् भ्वादि० आत्म० सक० सेट् । अम्बते